श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ सन्निवेशपद्धतिः पञ्चविंशी ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ सन्निवेशपद्धतिः पञ्चविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अणोरणीयसीं विष्णोर्महतोऽपि महीयसीम्।
प्रपद्ये पादुकां नित्यं तत्पदेनैव सम्मिताम्॥ २५.१ ॥

प्रतितिष्ठति पादसंमितायां त्वयि नित्यं मणिपादुके ! मुकुन्दः।
इतरे तु परिच्छदास्त एते विभवव्यञ्जनहेतवो भवन्ति॥ २५.२ ॥

तव रङ्गनरेन्द्रपादरक्षे ! प्रकृतिः सन्नपि भक्तिपारतन्त्र्यात्।
भवतीं वहतीव पन्नगेन्द्रः प्रथितस्वस्तिकलक्षणैः शिरोभिः॥ २५.३ ॥

परस्य पुंसः पदसन्निवेशान् प्रयुञ्जते भावितपञ्चरात्राः।
अघप्रतीपानपदिश्य पुण्ड्रान् अङ्गेषु रङ्गेशयपादुके ! त्वाम्॥ २५.४ ॥

विमृश्य रङ्गेन्द्रपतिंवरायाः श्रुतेः स्थितां मूर्धनि पादुके ! त्वाम्।
बध्नन्ति वृद्धाः समये वधूनां त्वन्मुद्रितान्याभरणानि मौळौ॥ २५.५ ॥

वहन्ति रङ्गेश्वरपादरक्षे ! दीर्घायुषां दर्शितभक्तिबन्धाः।
आशाधिपानामवरोधनार्यः त्वन्मुद्रिकां मङ्गळहेमसूत्रैः॥ २५.६ ॥

व्यूहक्रमेण प्रथितारमग्रे सन्दर्शयन्ती मणिपादुके ! त्वाम्।
पातुं त्रिलोकीं पदपद्मभाजं सौदर्शनीं शक्तिमवैमि शौरेः॥ २५.७ ॥

बद्धासिका कनकपङ्कजकर्णिकायां
    मध्ये कृशा मुररिपोर्मणिपादुके ! त्वम्।
सन्दृश्यसे सरसिजासनया गृहीतं
    रूपान्तरं किमपि रङ्गविहारयोग्यम्॥ २५.८ ॥

मानोचितस्य मदधीनजनस्य नित्यं
मा भूदतः कृपणतेति विचिन्तयन्त्या।
बन्दीकृतं ध्रुवमवैमि वलग्नदेशे
कार्श्यं त्वया कमललोचनपादरक्षे !॥ २५.९ ॥

मध्ये कृशामुभयतः प्रतिपन्नवृद्धिं
मन्ये समीक्ष्य भवतीं मणिपादरक्षे !।
नित्यं मुकुन्दपदसङ्गमविप्रयोगौ
निश्चिन्वते कृतधियः सुखदुःखकाष्ठाम्॥ २५.१० ॥

रङ्गेशितुश्चरणपङ्कजयोर्भजन्ती
रक्षाप्रसाधनविकल्पसहामवस्थाम्।
मान्याकृतिर्निविशसे मणिपादरक्षे !
मध्ये परिच्छदविभूषणवर्गयोस्त्वम्॥ २५.११ ॥

अङ्गान्तरेषु निहितान्यखिलानि कामं
पर्यायकल्पनसहानि विभूषणानि।
नित्यं मुकुन्दपदपद्मतलानुरूपं
नैपथ्यमम्ब ! भवती नयनाभिरामम्॥ २५.१२ ॥

ये नाम भक्तिनियतैस्तव सन्निवेशं
निर्विश्य नेत्रयुगलैर्न भजन्ति तृप्तिम्।
कालक्रमेण कमलेक्षणपादरक्षे !
प्रायेण ते परिणमन्ति सहस्रनेत्राः॥ २५.१३ ॥

पदमप्रमाणमिति वादिनां मतं
मधुजित्पदे महति मास्म भूदिति।
व्युदपादि तस्य चरणावनि ! त्वया
निगमात्मनस्तव समप्रमाणता॥ २५.१४ ॥

अप्रभूतमभवज्जगत्त्रयं यस्य मातुमुदितस्य पादुके !।
अप्रमेयममितस्य तत्पदं नित्यमेव ननु सम्मितं त्वया॥ २५.१५ ॥

आलवालमिव भाति पादुके ! पादपस्य भवती मधुद्विषः।
यत्समीपविनतस्य शूलिनः सारिणी भवति मौळिनिम्नगा॥ २५.१६ ॥

मोदमानमुनिबृन्दषद्पदा भाति मुक्तिमकरन्दवर्षिणी।
काऽपि रङ्गनृपतेः पदाम्बुजे कर्णिका कनकपादुकामयी॥ २५.१७ ॥

युगपदनुविधास्यन् यौवतं तुल्यरागं
यदुपतिरधिचक्रे यावतो रूपभेदान्।
तदिदमतिविकल्पं बिभ्रती सन्निवेशं
तव खलु पदरक्षे ! तावती मूर्तिरासीत्॥ २५.१८ ॥

तत्तद्वृत्तेरनुगुणतया वामनीं व्यापिनीं वा
प्राप्ते रङ्गप्रथितविभवे भूमिकां सूत्रधारे।
मन्ये विश्वस्थितिमयमहानाटिकां नेतुकामा
नानासंस्था भवति भवती पादुके ! नर्तकीव॥ २५.१९ ॥

माने परं समाने प्रत्यक्षेणागमेनापि।
हरिचरणस्य तवापि तु वैषम्यं रक्ष्यरक्षकत्वाभ्याम्॥ २५.२० ॥

॥ इति श्रीपादुकासहस्रे सन्निवेशपद्धतिः पञ्चविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥